ल्युट् । १बधस्थाने हारा० भावे ल्युट् । २हनने ।

**आघार** पु० आ+घृ–णिच्–कर्मणि अच् । १घृते । भावे अच् । आहितवह्नेः वायव्यकोणादारभ्याग्नेयं यावत् नैर्ऋतीमारभ्य ऐशानीं यावच्चाविच्छिन्नधारया २घृतसेचने । “तूष्णीमाघारावाघार्य्याज्यभागौ जुहुयादग्नये स्वाहा सोमाय स्वाहा” आश्व०गृ० । ‘तूष्णीं मन्त्रवर्जम् उत्तरपश्चिमाया आरभ्य दक्षिणपूर्व्वाम् प्रत्यविच्छिन्नामाज्यधारां हरेत् तथा दक्षिणपश्चिमामारभ्य उत्तरपूर्व्वां प्रत्याघारयेत्” तद्वृत्तिः इति ऋग्वेदिनाम् । यजुर्वेदिनान्तु मन्त्रोच्चारपूर्व्वकं तत्सेचनमिति भेदः उभयवेदिनामपि आघारकाले प्रजापतीन्द्रयोर्मनसा ध्यानम् आज्यं च स्रुवे चतुर्व्वारं ग्राह्यमिति विवेकः ।

**आघूर्णित** त्रि० आ+घूर्ण–क्त । १ चलिते, २भ्रान्ते च ।

**आघृणि** पु० आगतो घृणिर्दीप्तिरस्य । सूर्य्ये । “एहि वां विमुचो न पादाघृणे ! संसचावहै” । ‘रायोधारास्याघृणे वसो !” ऋ० ६,५५,१,२ । आघृणे ! आगतदीप्ते ! हे पूषन् !” भा० ।

**आघोषण** न० आ+घुष–ल्युट् । सर्व्वत्र प्रचारणायोच्चैः-शब्दकरणे । णिच्–युच् । आघोषणाप्यत्र स्त्री ।

**आघ्राण** त्रि० आ+घ्रा-क्त । १गृहीतगन्धे पुष्पादौ नासिकया यस्य गन्धज्ञानं जातं तस्मिन् २तृप्ते च भावे क्त । ३ गन्धग्रहणे ४ तृप्तौ च न० ।

**आघ्रात** त्रि० आ+घ्रा–क्त वा तस्य नत्वाभावः । १गृहीतगन्धे पुष्पादौ २तृप्ते ३ अस्पृष्टे च “युग्माद्यनाघ्राततिथिविषयम्” ति०त० रघुनन्दनः ।

**आघ्रेय** त्रि० आ+घ्रा–यत् । घ्राणेन ग्राह्ये “आघ्रेयः सर्व्वदेवानाम्” धूपदानमन्त्रः ।

**आङ्** अव्य० अत–बा० डाङ् प्रयोगे तस्य ङित्त्वम् । आशब्दार्थे तच्छब्दे विवृतिः तत्र ईषदर्थे आताम्रः आपिङ्गलः अभिव्याप्तौ आब्रह्मास्त्यासकलात् । सीमायाम् “आसमुद्रक्षितीशानामानाकरथवर्त्मनाम्” रघुः धातुविशेषयोगेनार्थविशेषे आगच्छति आतिष्ठते आलम्बते ‘तुलां यदारोहति दन्तवाससा” अभ्यासे आवृत्तिः अभ्यावृत्तः । प्रत्यावृत्तौ प्रत्यागच्छति । समन्ताद्वृत्तौ आचितः आकीर्णः ।

**आङ्कुशायन** त्रि० अङ्कुशेन निर्वृत्तादि सङ्काशा० चतुरर्थ्याम् फक् । अङ्कुशनिर्वृत्तादौ । [ रणयुक्ते ।

**आङ्कुशिक** त्रि० अङ्कुशः प्रहरणमस्य ठक् । अङ्कुशप्रह-

**आङ्ग** न० अङ्ग+स्वार्थे अण् । १कोमलाङ्गे अङ्गादागतः अण् । व्याकरणप्रसिद्धे २अङ्गाधिकारविहिते कार्य्ये “वर्णादाङ्गं बलीयः” परिभाषा अङ्गदेशे भवः अण् । ३अङ्गदेशभवे त्रि० बहुवचने तु तस्य लुक् अङ्गाः । अङ्गानां राजा अण् । ४अङ्गदेशस्य राजनि बहुषु लुक् अङ्गाः तद्राजषु । स्त्रियां प्राच्यत्वान्न लुक्, आङ्गी ।

**आङ्गक** त्रि० अङ्गेषु जनपदेषु भवः वुञ् । १अङ्गदेशभवे । अङ्गाः क्षत्रियाः तद्देशन्पतयो भक्तिरस्य वुञ् । अङ्गदेशक्षत्रिया यस्य सेव्याः तस्मिन् २बहूनामङ्गदेशक्षत्रियाणां सेवके । अङ्गा जनपदोभक्तिरस्य वुञ् । ३बहुत्ववदङ्गजनपदसेवके च त्रि० ।

**आङ्गविद्य** त्रि० अङ्गविद्यां वेद “अङ्गक्षत्रधर्म्मत्रियागाद्विद्यान्तान्नेति वक्तव्यम्” वार्त्ति० ठको निषेधात् अण् । १व्याकरणाद्यङ्गविद्यावेत्तरि । तद्व्याख्यानो ग्रन्थः ऋगयनादि० अण् । २अङ्गविद्याव्याख्याने ग्रन्थे अङ्गविद्यायां भवः अण् । ३तद्विद्याभवे । [ समूहे ।

**आङ्गार** न० अङ्गाराणां समूहः भिक्षादि० अण् । अङ्गार-

**आङ्गिक** त्रि० अङ्गेन अङ्गचालनेन निर्वृत्तम् अध्यात्मा०ठक् । भावव्यञ्जके अङ्गनिष्पन्ने नटादीनां १भ्रूविक्षेपादौ । “भवेदभिनयोऽवस्थानुकारः स चतुर्विधः । आङ्गिको वाचिकश्चैवमाहार्य्यः सात्विकस्तथा” सा०द० । स्त्रीणां चेष्टाविशेषे २हावादौ । “यौवने सत्वजास्तासामष्टाविंशति सङ्ख्यकाः । अलङ्कारास्तत्र हावभावहेलास्त्रयोऽङ्गजाः” सा०द० । हावादयश्च तत्तच्छब्दे वक्ष्यन्ते “अङ्गं मृदङ्ग तद्वाद्यं शिल्पमस्य ठक् । मृदङ्गवादनशिल्पके त्रि० ।

**आङ्गिरस** पुंस्त्री० अङ्गिरसोऽपत्यम् अण् । १अङ्गिरस ऋषेरपत्ये “अध्यापयामास पितॄन् शिशुराङ्गिरसः कविः” मनुः । बहुत्वेऽणो लुक् । अङ्गिरसः स्त्रियां न लुक् ङीप् । “आथर्वणीराङ्गिरसीर्दैवीर्मनुष्यजा उत” अथ० ८,५,९ । २बृहस्पतौ तस्य तदपत्यत्वम् भा० आ०प० ६६अ० । “अङ्गिरसस्त्रयः पुत्राः लोके सर्व्वत्र विश्रुताः । बृहस्पतिरुतथ्यश्च संवर्त्तश्च धृतव्रतः” । अङ्गिरसा दृष्टम् अण् । अथर्ववेदोक्ते ३सूक्तभेदे ‘अथर्व्वाङ्गिरसं नीलरुद्रं देव्यपराजिता । मधु सूक्तं रौधसञ्च शान्तिकाध्यायमेव च । अथर्व्वाणौ द्वारपालौ पठेतामुत्तराश्रितौ” दानपारि० पुरा० । तच्च सूक्तं अथर्वसंहितायां १८,१,५८,५९,६०, ६१ मन्त्र चतुष्कात्मकम्, “अङ्गिरसो नः पितरः” इत्यादिकम् । तच्च तुलादानादिपद्धतौ अस्माभिः १८५ पृ० दर्शितम् अङ्गिनामङ्गानां रसः सारः स्वार्थे अण् ।